दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-254 | 1 | जुलाई 12 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः उत्तरायणः श्रावणकृष्णद्वितीया
आषाढ़ 28 प्रविष्टांशः मङ्गलमयः भवेत्

2 Parakh Survey: हिमाचलप्रदेशस्य बालकाः गणिते दुर्बलाः, धनस्य गणनामपि कर्तुम् असमर्थाः अभवन्

3 कान्ताप्रसादबडोला पूर्वप्राचार्यः, राजेन्द्रकुमारगौनियालः प्रधानाचार्यः च गुरुरूपेण सम्मानितौ

4 श्रीमद्भागवतप्रवचनम्-05 कलियुगं मया न हन्तव्यमिति एवं कथनान्तरं भक्तिदेव्यै तस्याः प्रश्नानाम् उत्तरं नारदः दद्त् वर्तते।

## श्रावणमासस्य कावडयात्रा समारब्धा



हिमसंस्कृतवार्ताः - श्रावणमासस्य कावडयात्रा गतदिवसे समारब्धा । प्रातःकालादारभ्य बहुसंख्यकाः तीर्थयात्रिणः गङ्गाजलं समानेतुम् उत्तराखण्डस्य हरिद्वारम्, ऋषिकेशम्, नीलकण्ठमहादेवम्, गंगोत्री धाम च प्रविशन्तः सन्ति। प्राप्तवार्तानुसारं कावडयात्राम् अभिलक्ष्य सर्वकारेण प्रशासनेन च यात्रायाः सर्वाः पूर्वसिद्धताः कृताः सन्ति ।

## भारतं स्वदेशीयप्रौद्योगिक्याः उपयोगेन ऑपरेशन सिन्दूर् इत्यस्मिन् सफलतां प्राप्तुं समर्थम् अभवत्- राष्ट्रियसुरक्षापरामर्शकः अजीत-डोभालः



हिमसंस्कृतवार्ताः - राष्ट्रियसुरक्षा-परामर्शदः अजीत-डोभालः उक्तवान् यत् भारतं स्वदेशीयप्रौद्योगिक्याः उपयोगेन ऑपरेशन सिन्दूर् इत्यस्मिन् सफलतां प्राप्तुं समर्थम् अभवत्, तस्मात् अष्टाविंशतिनिमेशेषु एव पाकिस्तानपारं नव वा दश लक्ष्याणां प्रहारोऽपि साधितः। आईआईटी-मद्रास-इत्यस्य द्विषष्टि-तमे दीक्षान्तसमारोहे स्वभाषणे सः अवदत् यत् ऑपरेशन सिन्दूरस्य समये भारतीयसैन्यस्य पार्श्वे युद्धक्षेत्रे, ब्राहमोस्, एकीकृतवायु-निर्देशन-प्रणाली, रडार् इत्याद्यः अत्याधुनिक देशीयप्रौद्योगिक्यः आसन् । श्रीडोभालः अवदत् यत् एषः सहस्रवर्षेषु एकः सुसमयः वर्तते यद्वि देशस्य युवानः एतत् त्यक्तुं न शक्नुवन्ति। सः छात्रान् युवान् च आह्वानं कृतवान् यत् ते दुर्लभपृथिवीखनिजाः, कृत्रिमबुद्धिः, क्वाण्टम् कम्प्यूटिङ्ग् च इत्यादीनां संसाधनानाम् उपयोगेन, सप्तचत्वारिंशदुत्तर-द्विसहस्रतमवर्षपर्यन्तं प्रौद्योगिकीनां आविष्कारं कृत्वा देशं विकसितराष्ट्र प्रति उन्नयेयुः । सः प्रतिपादितवान् यत्, शिक्षा-कौशल-प्रौद्योगिक्या युक्तं विशाल-युवजन-संख्याकं भारतं अग्रिमेषु वर्षेषु देशस्य सर्वांगिक-वृद्धेः योगदानं कर्तुं शक्नोति ।

## सर्वकारेण देशस्य स्वच्छ-स्थायि-वस्तुवाहन-गति-शीलतायाः परिवर्तने सहायतार्थं विद्युत्-वाहनानां प्रोत्साहनार्थं योजना समारब्धा



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी आभासीयमाध्यमेन विभिन्नेषु सर्वकारीयविभागेषु संस्थासु च नवनियुक्तानां युवानां कृते एकपञ्चाशत्-सहस्राधिकानां नियुक्तिपत्रां वितरणं करिष्यति। सः अस्मिन् अवसरे नव-नियुक्तान् युवजनान् अपि सम्बोधयिष्यति। अवधेयमस्ति यत् षोडशतम-उद्योग-सम्मेलनम् देशे सप्तचत्वारिंशत् स्थानेषु भविष्यति। केन्द्रसर्वकारस्य मन्त्रालयेषु, विभिन्न-विभागेषु च एताः नियुक्तयः भवन्ति ।

## अन्ताराष्ट्रियमुद्राकोषेण, यू.पी.आई इति मुद्रा-विनिमय-प्रणाल्याः प्रशंसा कृता




हिमसंस्कृतवार्ताः - अन्ताराष्ट्रियमुद्राकोषेण युनिफाइड्-पेमेण्ट्स्-इण्टरफेस्-सिस्टम्, यु.पि.आई इत्यस्य मुद्रा-विनिमय-प्रणाल्याः प्रशंसा कृता। उक्तं च यत् अनया प्रणाल्या एव भारतं द्रुततर-मुद्राविनिमये विश्वनायकः अभवत् । "ग्रोइंग-रीटेल्-डिजिटल पेमेण्ट्स्" इति शीर्षकोपेते अस्मिन् लेखे उक्तं यत्- यूपीआई-इत्यनेन भारते डिजिटल-मुद्राविनिमय-परिदृश्यं परिवर्तितम् अस्ति ।

## विभिन्नेषु सर्वकारीयविभागेषु संस्थासु च नवनियुक्तानां युवानां कृते एकपञ्चाशत्-सहस्राधिकानां नियुक्तिपत्रां वितरणं करिष्यति प्रधानमन्त्री नरेन्द्रमोदी



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी आभासीयमाध्यमेन विभिन्नेषु सर्वकारीयविभागेषु संस्थासु च नवनियुक्तानां युवानां कृते एकपञ्चाशत्-सहस्राधिकानां नियुक्तिपत्रां वितरणं करिष्यति। सः अस्मिन् अवसरे नव-नियुक्तान् युवजनान् अपि सम्बोधयिष्यति। अवधेयमस्ति यत् षोडशतम-उद्योग-सम्मेलनम् देशे सप्तचत्वारिंशत् स्थानेषु भविष्यति। केन्द्रसर्वकारस्य मन्त्रालयेषु, विभिन्न-विभागेषु च एताः नियुक्तयः भवन्ति ।

## सुभाषितम्

**बुद्धिरुत्पद्यते तादृग्, यादृक् कर्मफलोदयः।
सहायास्तादृशा एव, यादृशी भवितव्यता॥
(शुक्रनीतिः- १।४६)**

अर्थात्- जैसा कर्मों का फल-उदय होता है, वैसी ही बुद्धि उत्पन्न होती है। और जैसी भवितव्यता होती है, वैसे ही सहायक भी हो जाते हैं।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## जम्मू-कश्मीरे राज्य-अन्वेषण-सम्भागेन त्रयेषु स्थानेषु कृतम् अन्वेषणाभियानम्




हिमसंस्कृतवार्ताः - जम्मू-कश्मीरे राज्य-अन्वेषण-सम्भागेन आतङ्कवाद-वित्तपोषण-अन्वेषणस्य भागरूपेण जम्मू, डोडा, हण्डवाड़ा इत्यादिषु त्रयेषु स्थानेषु अन्वेषणाभियानं कृतम्। क्रिप्टोमुद्रायाः माध्यमेन सीमापारं वित्तपोषणं कृत्वा, आतङ्कवादस्य प्रेरणायाः अथ, शान्तेः अस्थिरता-प्रयत्नानां च षड्यंत्रं लक्ष्यीकृत्य, अन्वेषणमिदं कृतम् ।

# Parakh Survey: हिमाचलप्रदेशस्य बालकाः गणिते दुर्बलाः, धनस्य गणनामपि कर्तुम् असमर्थाः अभवन्



**हिमसंस्कृतवार्ताः- शिमला।** परखसर्वेक्षणे २०२५ तमे वर्षे तृतीय- षष्ठ- नवम- वर्गस्य ७० प्रतिशतं छात्राः गणितशास्त्रे दुर्बलाः इति ज्ञाताः। अस्मिन् तृतीय- षष्ठी- कक्षयोः छात्राः अपि मूलभूतगणनासु दुर्बलाः भवन्ति। ते गणितस्य मूलप्रश्नानाम् अपि उत्तरं दातुं न शक्नुवन्ति। एतत् परखसर्वेक्षणस्य प्रतिवेदने प्रकाशितम्। सर्वेक्षणप्रतिवेदनस्य आधारेण जिला हमीरपुरं प्रथमस्थाने अस्ति। उच्चप्राथमिकस्तरस्य अर्थात् षष्ठीतः नवमीवर्गस्य बालकानां प्रदर्शनमपि चिन्ताजनकम् अस्ति। अत्र केवलं ४२ प्रतिशतं बालकाः गणितस्य मूलभूतप्रवीणतां प्राप्तुं समर्थाः अभवन्। अधिकांशबालानां बीजगणितस्य ज्ञानमपि नास्ति। सूचनानुसारं तृतीयवर्गस्य प्रतिवेदने जिला हमीरपुरं, लाहौल-स्पीतिः, सिरमौरः च उदित (प्रथम) वर्गे सन्ति। कांगड़ा उदिते (द्वितीयं), सोलनं, चम्बा, किन्नौरः, कुल्लूः, ऊना उन्नतं (तृतीये) तथा बिलासपुरं, मण्डी, शिमला उद्भव (चतुर्थे) स्थाने सन्ति। षष्ठी कक्षायां शिमलामण्डलं प्रथमस्थाने, हमीरपुरं, काङ्गड़ा, सिरमौरं द्वितीये, चम्बा, सोलनम्, कांगड़ा, कुल्लू तृतीये तथा बिलासपुरं, मण्डी, ऊना तृतीये स्थाने सन्ति। नवमीकक्षायां हमीरपुरं प्रथमस्थाने, चम्बा, शिमला, ऊना द्वितीयस्थाने, बिलासपुरं, कांगड़ा, सिरमौरः, सोलनं तृतीयस्थाने तथा किन्नौरः, कुल्लू, मण्डी तृतीयस्थाने सन्ति।परखशिक्षा सर्वेक्षणस्य जिला समन्वयिका बबिताठाकुर इत्यनया उक्तं यत् सर्वेक्षणप्रतिवेदनानुसारं गणितविषये बालकाः दुर्बलाः ज्ञाताः सन्ति। एतस्य उन्नयनार्थं अधुना छात्राणां कृते विशेषप्रशिक्षणं भविष्यति। अनेन परिष्कारः भविष्यति। सा अवदत् यत् सर्वेक्षणप्रतिवेदने बालिकाछात्राः उत्तमं प्रदर्शनं कृतवत्यः।

# कङ्गनया समाजसेवा शिक्षितव्या भविष्यति, शान्ताकुमारस्य सांसदं प्रति परामर्शः



हिमसंस्कृतवार्ताः- पालमपुरम्। पूर्वमुख्यमन्त्री पूर्वकेन्द्रीयमन्त्री च शान्ताकुमारः अवदत् यत् मण्ड्यां बहवः जनाः स्वपरिवारेण सह मलिनतायां वाहिताः, ये जीविताः ते निराशाः असहायरूपेण भ्रमन्ति। सः प्रसन्नतां प्रकटितवान् यत् राज्यं केन्द्रसर्वकारं च केचन जनाः च आश्रयकार्ये साहाय्यं कुर्वन्ति, परन्तु कङ्गनारणौत इत्यादयः केचन नेतारः धनिनः च अद्यापि आश्रयकोषाय किमपि साहाय्यं न दत्तवन्तः इति अतीव आश्चर्यम्। कङ्गना रणौत राज्यस्य एतादृशी समर्था वीरपुत्री अस्ति, या सरलग्रामात् परिवारात् च बहिः आगत्य भारतस्य चलच्चित्रजगति महतीं ख्यातिम् अर्जितवती अस्ति। तेन एव सामर्थ्येन परिश्रमेण च सा राजनीतिषु अपि स्वनामकरणं कर्तुं शक्नोति। इदानीं सा राजनीतिक्षेत्रे आगता, तया समाजसेवायाः सर्वे विषयाः ज्ञातव्याः भविष्यन्ति। सः कङ्गना रणौत इत्यस्याः आग्रहं कृतवान् यत् सः तत्क्षणमेव स्वपक्षतः महत्धनम् आश्रयकोषाय दानं करोतु, तदनन्तरं च चलच्चित्रजगतः स्वस्य कोट्याधिपतिमित्रेभ्यः धनं संग्रह्य आश्रयकोषे योगदानं दातुम् प्रेरयतु। राज्यसभा सहितं राज्ये षट् सांसदाः सन्ति। तेषां सांसदनिधिः अपि ३० कोटिः अस्ति। आशास्ति यत् एतत् धनम् आश्रयकार्ये अपि उपयुज्यते। सः अवदत् यत् सौभाग्येन उत्तरभारतस्य पञ्चसु समृद्धेषु राज्येषु हिमाचलप्रदेशः अन्यतमः अस्ति। यदि कर्मचारी, अधिकारिणः, नेतारः अन्ये च समृद्धाः जनाः आश्रयकोषे धनदानं कुर्वन्ति तर्हि आश्रयकोषे कोटिरूप्यकाणि सङ्गृह्यन्ते। एतादृश्यां घोरविपत्तौ सम्पूर्णसमाजस्य एकीकृत्य सर्वप्रयत्नाः करणीयाः भविष्यन्ति। अद्यत्वे आपदापीडितानां साहाय्यं करणं ईश्वरस्य यथार्थपूजा अस्ति।

# IRCTC इति दक्षिणभारतस्य तीर्थस्थलानां भ्रमणं कारयिष्यति, विशेषपुटकं विमोचितम्



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।भारतगौरव-विशेषपर्यटनरेलयानम् दक्षिणभारतस्य प्रमुखतीर्थस्थलानां भ्रमणार्थं रेलवेपर्यटनशाखायाः IRCTC इत्यनेन २८ जुलै दिनाङ्के पठानकोटकैन्ट्-स्थानकात् ध्वजारोहिता भविष्यति। यात्रा १३ दिवसानां १२ रात्रिणां च भविष्यति, यस्मिन् भक्ताः तिरुपति, रामेश्वरम्, मदुरै, कन्याकुमारी, मल्लिकार्जुनं च द्रष्टुं शक्नुवन्ति।भारतगौरवविशेषपर्यटनरेलयानेन अर्थव्यवस्थावर्गः (स्लीपर) - 30,135/- रुप्यकाणि प्रतिव्यक्तिः, मानकवर्गः (3AC) - 43,370/- रुप्यकाणि प्रतिव्यक्तिः तथा विश्रामवर्ग (2AC) - 57,470/- रुप्यकाणि प्रतिव्यक्तिः भाटकं निर्धारितमस्ति। अस्मिन् भ्रमणसङ्केते रेलयानस्य यात्रापत्रं, त्रीणि भोजनानि, एसी/गैर-एसी बसयानैः स्थानीययात्रा, निवासः, यात्रासुरक्षा, पैरामेडिकल तथा भ्रमण-अनुरक्षण-कर्मचारिणां सुविधाः सन्ति एतस्मिन् रेलयाने यात्रिकाः जालन्धर-नगरम्, लुधियाना, चण्डीगढ-अम्बाला-कैन्ट्, कुरुक्षेत्रम्, करनाल्, पानीपत-सोनीपत्, हजरत-निजामुद्दीन, मथुरा, आगरा-कैन्ट्, ग्वालियर इत्यादिभ्यः प्रमुखेभ्यः स्थानेभ्यः आरोहणावरोहणं च कर्तुं शक्नुवन्ति।

# आरक्षणतालिकां स्थगयितुं विवादः,

## राज्यनिर्वाचनायोगः उपायुक्तान् कार्यविधिं कर्तुं सचेतितवान्

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलराज्यनिर्वाचन-आयोगस्य सचिवेन प्रसारिते पत्रे उपायुक्तेभ्यः उक्तं यत् निर्वाचनार्थं उपायुक्तानां पर्यवेक्षणं नियन्त्रणं च राज्यनिर्वाचनायोगस्य समीपे अस्ति। अतः एते आदेशाः लघुतया न ग्रहीतव्याः। गुरुवासरे नगरविकासविभागस्य प्रधानसचिवः देवेशकुमारः अनुसूचितजाति, अनुसूचितजनजातिः अन्यपृष्ठवर्गसमुदायस्य मतदातृणां वास्तविकसङ्ख्यायाः विवरणानां उपलब्धतायाः कारणात् आरक्षणतालिकां स्थगयितुं उपायुक्तेभ्यः आदेशं प्रसारितवान् आसीत्। परन्तु राज्यनिर्वाचन-आयोगस्य अप्रसन्नतायाः अनन्तरं आदेशाः निवृत्ताः अभवन् ।राज्यनिर्वाचनआयोगेन निर्गतपत्रे उद्धृतं यत् हिमाचलप्रदेशनगरपालिकाधिनियम १९९४ इत्यस्य धारा २८१, हिमाचलप्रदेशनगरनिर्वाचननियम २०१५ इत्यस्य धारा ९,९ई तथा हिमाचलप्रदेशनगरपालिकानिर्वाचननियमा २०१२ इत्यस्य धारा ३२ इत्यस्य अन्तर्गतं उपायुक्तानां संचालनार्थं पर्यवेक्षणं नियन्त्रणं च निर्वाचनं पूर्णतया राज्यनिर्वाचन-आयोगस्य समीपे अस्ति। अतः निर्वाचन-आयोगः कठोरकार्याणि कर्तुं बाध्यः न भवेत्। निर्वाचन-आयोगेन निर्गतस्य अस्य पत्रस्य अनन्तरं सर्वेषां उपायुक्तानां १५ जुलैपर्यन्तं आरक्षणतालिकायाः निर्णयः करणीयः भविष्यति।

# उत्तरप्रदेशस्य कानपुरे गृहे गृहे

## संस्कृतं योजनायाः आरम्भः - प्रांजल



हिमसंस्कृतवार्ताः- कानपुरनगरम्।उत्तरप्रदेश-संस्कृतसंस्थानम् लखनऊद्वारा 'गृहे गृहे संस्कृतम्' योजनान्तर्गतं द्वादशदिवसीयः १०/०७/२०२५ दिनांकतः सरलसंस्कृत- संभाषणस्य कक्षायाः उद्घाटनं प्राथमिकविद्यालय पाल्हेपुरं- २, कानपुरनगरे प्रधानाचार्यः रंजनराणामहोदयस्य उपस्थितौ अभवत्। कार्यक्रमे सरस्वती वन्दनां प्रशिक्षिका प्रांजल कृतवती। अस्याः योजनान्तर्गतं संस्थानस्य अधिकारिणः निदेशकः विनय श्रीवास्तव-महोदयः, भगवानसिंहमहोदयः, समन्वयकः धीरजमहोदयः, अनिलगौतममहोदयः, दिव्यरंजनमहोदयः, समन्वयिका राधाशर्मामहोदया इत्यादयः ऑनलाइनमाध्यमेन कार्यक्रमे आसन्।

# श्रीगुरुभ्रातृमण्डलेन आयोजितः दिव्यसम्मानसमारोहः

**कान्ताप्रसादबडोला पूर्वप्राचार्यः, राजेन्द्रकुमारगौनियालः प्रधानाचार्यः च गुरुरूपेण सम्मानितौ च सर्वाधिकांकप्राप्तवन्तौ। कमलकिशोरः सुशान्तभट्टः च छात्रौ गुरुपर्वणि अलंकृतौ**



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, उत्तराखण्डम्।** श्रीबालाजीमन्दिरपरिसरे श्रीगुरुभ्रातृमण्डल- कोटद्वारेण गुरुपूर्णिमापर्वणः शुभोपलक्ष्ये ब्रह्मलीनश्रद्धेयानां गुरूणां श्रीसत्यप्रसादबहुगुणावर्याणां प्रतिष्ठितमूर्तेः वेदोक्तपद्धत्या अनुसारम् अभिषेकपूजनकार्यं सम्यक् सम्पादितम्।तस्मिन्नभिषेकपूजनकर्मणि आचार्यश्रीः दिनेशप्रसादजुयालमहोदयः सान्निध्यं कुर्वन् आसीत्। पूजाकार्यं पण्डितः हरीशः उनियालः, पण्डितः वीरेंद्रकण्डवालः इत्येताभ्यां सम्यक् निष्पादितम्। पण्डितः अनिलघनसेला, पण्डितः पवनसुन्द्रियालः इत्येताभ्यां सुन्दरं भक्तिपूर्णं भजनसङ्कीर्तनप्रस्तुतिद्वारा, सर्वेषां जनानां चित्तं मोहितम्।अस्मिन् शुभसन्दर्भे, गुरुभ्रातृमण्डलसमित्या भारतीयसंस्कृतेः संस्कृतभाषायाश्च समुन्नतये पूर्वप्रधानाचार्या आचार्याय कान्ताप्रसादबडोलामहोदयाय च वर्तमानप्रधानाचार्याय डॉ॰ राजेन्द्रकुमारगौनियालमहोदयाय श्रीजगदेवसिंह- संस्कृतमहाविद्यालय- सप्तर्षिहरिद्वारस्थौ इत्यनयोः कृते प्रशस्तिपत्रं समर्पितम्।

शास्त्रीपरीक्षायाम् उत्कृष्टं स्थानं प्राप्तवन्तं कमलकिशोरं साहित्यशास्त्रीं (तृतीयवर्षं) च आचार्यपरीक्षायाम् सर्वाधिकं अङ्कं प्राप्तवन्तं सुशान्तभट्टं व्याकरणाचार्यं (प्रथमवर्षं) इत्येताभ्यां प्रशस्तिपत्रं प्रदानं कृतम्। संस्थायाः अध्यक्षेन श्रीराजदीपमाहेश्वरीमहोदयेन उक्तं यत्- "सर्वजनहिताय, सर्वजनसुखाय" इति भावनया परिपूर्णं श्रीगुरुपर्वं संपन्नम् अभवत्। तस्मिन्नवसरे श्रीबालमोहनध्यानीमहोदयः तथा श्रीप्रशान्तबुधौड़ीमहोदयः च गुरुपूर्णिमायाः महत्वं गुरोः जीवितचरित्रं च अवोचत्। समाप्तौ कार्यक्रमस्य प्रसादवितरणं महाभण्डारः च आयोजितौ। कार्यक्रमस्य सफलं संचालनं श्रीमान् डॉ॰ रमाकान्तकुकरेतीमहोदयः (पूर्वप्रधानाचार्यः, रा. इ. का. कण्वघाटी) द्वारा कृतम्।

# नागरीलिप्याः शिक्षणेन “पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च” इत्यस्याः राष्ट्रियकार्यशालायाः नवदशदिवसः सफलतया सम्पन्नः



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः नलबारी, ११ जुलाई २०२५,** कुमारभास्करवर्मसंस्कृत–पुरातनाध्ययनविश्वविद्यालयेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य सौजन्येन आयोज्यमानायाः “पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च” इत्यस्या एकविंशतिदिनात्मिकायाः राष्ट्रियकार्यशालायाः नवदशदिवसः अद्य सफलतया सम्पन्नः। कार्यशालायाम् अद्य नवदशदिवसे विशेषकार्यक्रमः सुसम्पन्नः।अस्मिन् अवसरे प्रमुखशिक्षकत्वेन केन्द्रीयसंस्कृतविश्वविद्यालय-एकलव्यपरिसरस्य बौद्धविभागाध्यक्षः डॉ. उत्तमसिंहमहोदयः उपस्थितवान्। महोदयेन नागरीलिपेः शिक्षायाः सन्दर्भे विस्तृतं व्याख्यानं दत्तम्। पाण्डुलिपीनां विकासयात्रा, ब्राह्मीलिपेः स्वरूपम्, तस्याः अन्यालिपिभिः सह सम्बन्धः च यथायोग्यं प्रकाशितः। तेन ब्राह्मीलिपेः वर्णसाम्येन ग्रन्थादिदिलिपीनाम् उद्भवः स्पष्टतया प्रतिपादितः।पाण्डुलिपीनां संरक्षणप्रकाराः, तेषां कालनिर्धारणप्रक्रिया, तथा च भिन्नभिन्नाभिलेखानाम् – अशोकशिलालेखादीनाम्– उदाहरणेन अध्यापनं कृतम्। भूर्जपत्रादिषु लिखितलिपीनां विषये अपि महोदयेन प्रत्यक्षदर्शनं प्रदत्तम्। विशेषतया खरोष्ठीलिपेः ब्राह्म्याः च तुलनात्मकपरीक्षणं प्रस्तुतम्।तदनन्तरं नागरीलिपेः पाठनं लेखनञ्च अपि सम्यक् प्रकारेण सम्पन्नम्। महोदयेन स्वरवर्णानां व्यञ्जनवर्णानां च लेखनाभ्यासः प्रतिभागिभ्यः कारितः।कार्यक्रमस्य सञ्चालनं कुमारभास्करवर्मसंस्कृत–पुरातनाध्ययनविश्वविद्यालयस्य सर्वदर्शनविभागाध्यक्षः डॉ. रणजीतकुमारतिवारी-महोदयेन सम्यक् विधाय सम्पन्नम्। वैदिकमङ्गलाचरणं विश्वविद्यालयस्य शोधच्छात्रेण सुरजसापकोटामहोदयेन सभक्तिपूर्वकं कृतम्।प्रतिदिनं प्रतिभागिनां मध्ये अभ्यासे प्रवृत्तिः, लिप्यधीतिश्रद्धा च लक्ष्यार्थतया दृश्यते। कार्यशाला यथाक्रमं प्रगतिशीलतां प्रतिपद्य उज्ज्वलफलप्रदं भविष्यं सूचयति।

# शिल्पा शेट्टी मराठीभाषा-विवादविषये अवदत्, अहं महाराष्ट्रस्य बालिका अस्मि



**हिमसंस्कृतवार्ताः - जगदीश डाभी, मुम्बई।**

एतेषु दिनेषु महाराष्ट्रे मराठीभाषायाः विषये बहु विवादः प्रचलति। अस्मिन् विषये विभिन्नराज्यानां जनाः अपि प्रतिक्रियां ददाति। बृहत् चलच्चित्रतारकाः अपि एतस्य विषये वदन्ति। अधुना एव यदा बॉलीवुडाभिनेत्री शिल्पा शेट्टी इत्यस्याः विषये एव प्रश्नः कृतः तदा सा उत्तरं दातुं न अस्वीकृतवती। अधुना एव दक्षिणस्य चलच्चित्रस्य केडी-द डेविल इत्यस्य विज्ञापन पुटकं मुम्बईनगरे प्रदर्शितम्। अस्मिन् दक्षिणचलच्चित्रे ध्रुव सरजा, संजय दत्तः, शिल्पा शेट्टी च मुख्यभूमिकासु दृश्यन्ते। दक्षिणस्य इदं चलच्चित्रं हिन्दीभाषायाम् अपि प्रदर्शितं भविष्यति। अतः मुम्बईनगरे अस्य विज्ञापन पुटकस्य प्रारम्भः अभवत्। मुम्बईनगरे विज्ञापनप्रक्षेपणकार्यक्रमे संजयदत्तः शिल्पा शेट्टी च अपि भागं गृहीतवन्तौ। अस्मिन् समये शिल्पा इत्यनेन पृष्टं यत् चलच्चित्रस्य भाषा नास्ति इति। किं सा मन्यते यत् भाषां शिक्षितुं बाध्यता कर्तव्या? प्रश्नं श्रुत्वा शिल्पा प्रथमं उत्तरं दातुं न अस्वीकृतवती, सञ्जुबाबा उत्तरं दास्यति इति च अवदत्। एतस्मिन् विषये संजयः अवदत् यत् सः प्रश्नं न अवगच्छामि। तदनन्तरं शिल्पा उक्तवती, अहं महाराष्ट्रस्य बालिका (मी महाराष्ट्र ची मुल्गी आहे) अस्मि। परन्तु तदनन्तरं शिल्पा मराठीभाषाविवादविषये किमपि न उक्तवान्। ततः परं शिल्पा शेट्टी अवदत् यत् अद्य वयं केडी इति चलच्चित्रस्य विषये वदामः। यदि भवान् अन्यस्य कस्यचित् विवादस्य विषये वदति तर्हि अहं तस्य प्रचारं कर्तुं न शक्नोमि। एतत् चलच्चित्रं बहुषु भाषासु प्रदर्शितं भविष्यति तथा च वयं मराठीभाषायाम् अपि डब कर्तुं शक्नुमः।

# प्रधानमन्त्री नरेन्द्रमोदी घाना, त्रिनिदाद एण्ड टोबैगो, अर्जेन्टिना, ब्राजील, नामिबिया चेत्यादीनां पञ्चराष्ट्राणां सफल-यात्रायाः अनन्तरं नवदेहलीं प्राप्तवान

हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी घाना, त्रिनिदाद एण्ड टोबैगो, अर्जेन्टिना, ब्राजील, नामिबिया चेत्यादीनां पञ्चराष्ट्राणां सफलयात्रायाः अनन्तरं नवदेहलीं प्राप्तवान्। तस्य यात्रायाः अन्तिमे चरणे भारतेन नामिबियादेशेन च प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपस्थितौ, नामिबियादेशे उद्यम-शीलता-विकास-केन्द्रस्य स्थापनायै, स्वास्थ्यचिकित्साक्षेत्रे च सहकार्यस्य विषये द्वयोः सन्धि-ज्ञापन-पत्रयोः हस्ताक्षरं कृतम् । यात्रावधौ अस्मिन् वर्षे डिजिटल पेमेंट सिस्टम इत्यस्य आरम्भावसरे तिस्रः घोषणाः अपि कृताः सन्ति ।

# श्रीमद्भागवतप्रवचनम् -०६



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

कलियुगं मया न हन्तव्यमिति एवं कथनान्तरं भक्तिदेव्यै तस्याः प्रश्नानाम् उत्तरं नारदः ददत् वर्तते। कलियुगं न हन्तव्यं, यतोहि यत् फलं तपस्यया, योगेन, समाधिना च न प्राप्यते, तदेव फलम् अस्मिन् कलियुगे केवलं हरिनामकीर्तनेन हि सम्यक् प्राप्तुं शक्यते। यद्यपि युगमिदं सारहीनं, तथापि एकया दृष्ट्या सारयुक्तम् अवलोक्य तेन परीक्षिता अस्मिन् युगे उत्पन्नानां जीवानां सुखार्थं हि तत् रक्षितम् आसीत्।

अस्मिन् काले जनाः कुकार्येषु प्रवृत्ताः स्युः, इत्यतः वस्तूनां सारोऽपि निर्गतः, एवं पृथ्व्याः समस्तपदार्थाः तुषवत् सारहीनाः सञ्जाताः सन्ति। ब्राह्मणः केवलम् अन्नधनादीनां लोभवशीभूतः सन् गृहे गृहे, एवं जने जने भागवतकथां श्रावयितुम् आरब्धवान्, अतः कथासारः ततः निर्गतः। तीर्थेषु नानाविधाः कुकर्मिणः, नास्तिकाः एवं व्यभिचारिणः, असज्जनाः वा स्थातुम् आरब्धवन्तः, तस्मात् तीर्थप्रभावः अपगतः। येषां चित्तं कामः क्रोधः, अतिलोभः, तृष्णा इत्यादिभिः निरन्तरं सन्तप्तं स्यात्, तादृशाः अपि घोरतपस्यायाः नाटकं कुर्वन्तः परिलक्ष्यन्ते, एतेषां कारणतः तपसः सारः बहिर्भूतः। मनोनिग्रहस्य अभावात् तथा लोभ-दम्भ-पाखण्डादीनाम् आश्रयत्वात्, एवं शास्त्राणाम् अनभ्यासत्वात् च ध्यानयोगस्य फलं समाप्ततां गतम्। पण्डितानां दशा यत् ते स्त्रीभिः सह पशुवत् रमणं कुर्वाणाः स्युः, तेषु संतत्युत्पादने हि कुशलता प्राप्यते, परन्तु मुक्तिसाधने ते सर्वथा अकुशलाः एव। सम्प्रदायानुसारं प्राप्ता वैष्णवता अपि न क्वापि दृश्यते। एवं प्रकारेण स्थाने स्थाने सर्वेषां वस्तूनां सारः लुप्तः जातः। अस्य युगस्य स्वभावः हि एतादृशः, अत्र न कस्यापि दोषः। अस्मात् कारणात् हि अत्यन्तं समीपे स्थितः पुण्डरीकाक्षः भगवान् एतत्सर्वं सहमानः वर्तते। सूतदेवः अकथयत्- शौनक! एवं प्रकारेण देवर्षेः नारदस्य वचनं विश्रुत्य भक्तिदेवी नितराम् आश्चर्यान्विता जाता; पुनः सा किमुक्तवती इति तत् श्रूयताम्।

भक्तिः उक्तवती- देवर्षे! त्वं धन्यः असि! मम महत् सौभाग्यं यत्, तव अत्र आगमनं जातम्। संसारे साधूनां दर्शनं हि समस्तसिद्धीनां परमं कारणम् अस्ति। तव सकृत् उपदेशं धारयित्वा कयाधूकुमारः प्रह्लादः मायां पूर्णतः जितवान् आसीत्। ध्रुवः अपि त्वत्कृपया हि ध्रुवपदं प्राप्तवान्। त्वं सर्वमङ्गलमयः असि, साक्षात् श्रीब्रह्मणः पुत्रः असि, अहं त्वां नमस्करोमि इति, शुभम्। (माहात्म्यम्-०१/६८-८०)

श्रीपद्मपुराणोत्तरखण्डान्तर्गते श्रीमद्भागवतमाहात्म्ये सरलभाषानुवादेऽस्मिन् भक्तिनारदसमागमो नाम प्रथमोऽध्यायः सम्पूर्णः।

।।श्रीकृष्णार्पणमस्तु।।

# गुरोः पूर्णिमा- संस्कृत-काव्यम्!



गुरोः कृपाकटाक्षेण विद्यया योजितोऽहम्।
तमेव शरणं यामि दुःखस्यान्तं करोतु सः॥१॥
शिष्यस्य मनसि दीपः ज्ञानरूपः सदैव यः।
स एव गुरुशब्देन पूज्यते लोकेषु सत्यम्॥२॥
गुरोः पदं समालम्ब्य भवसागरतातनम्।
नियच्छति च मन्येऽहं तं वन्दे ज्ञानसागरम्॥३॥
पूर्णिमा या शुभा जाता गुरोः स्मरणहेतवे।
सा मे मनसि सन्धत्तां श्रद्धां भक्तिं च नित्यशः॥४॥
नमः शारदया सह गुरुजनाभ्यः पुनः पुनः।
येषां प्रसादतः स्फूर्तिः वाणी च विमलाकृता॥५॥

पल्लवी द्विवेदी- लेखिका
संस्कृतच्छात्रा, संस्कृतसेविका
झूंसी प्रयागराज उत्तरप्रदेश।

# "लौकिकन्यायकोशः" "जलाग्निन्यायः"



जलम् अग्निश्च परस्परविरोधिद्रव्यद्वयम्। तद् द्वयम् एकत्र स्थातुं न शक्नोति। यस्य अंशो न्यूनः सः शीघ्रं नश्यति। तथैव द्वयोः परस्परं वैरं वहतोः एकत्र स्थितिः अशक्या। स्थितौ जातायामपि यः दुर्बलः तस्य नाशः अचिरादेव भवति इति न्यायेन अनेन सूच्यते।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# क्रीडया गीतैश्च बालाः संस्कृत भाषां वदन्ति- वर्धते संस्कृत भाषायां जनानां अनुरागः




**हिमसंस्कृतवार्ताः- पूनम सिंहः, जौनपुरम्।** उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊद्वारा सञ्चल्यमानायाः "गृहे गृहे संस्कृतम्" इति योजनायाः अन्तर्गतं द्वादशदिवसीय- सरलसंस्कृत- संभाषणशिविरस्य उद्घाटनं "एम. एस. पब्लिक विद्यालयः, कलीचाबाद जौनपुर (उत्तरप्रदेश) जनपदे १०/ ०७/ २५ दिनाङ्के अभवत्। अस्मिन् अवसरे प्रधानाचार्या रेखा सोनकरः दीपप्रज्वलनं कृत्वा सरस्वती देव्यैः प्रतिमायाः मल्यार्पणं कृतवती। शिक्षिका पूनम सिंहः सरस्वती वन्दना कृतवती। योजनान्तर्गतं संस्थानस्य अधिकारिणः जगदानन्द झा महोदयः, निर्देशक विनय श्रीवास्तवः, भगवानसिंहमहोदयः, समन्वयकः धीरज मैठाणीवर्यः, अनिल गौतममहोदयः, दिव्यरंजनमहोदयः, राधाशर्मामहोदया आभासीपटलमाध्यमेन कार्यक्रमे उपस्थिताः आसन्।

## हास्यकणिका



**पत्न्या सह युद्धं मास्तु!**

पत्न्या सह कदापि युद्धं मा कुरु। यत् वदति, स्वीकृत्य पालनम् अवश्यमेव करणीयम्।
कारणम्- पत्नी सम्पूर्णरूपेण शक्तिशालिनी अस्ति। यदि धनम् इच्छति - तर्हि लक्ष्मीः
यदि विद्याम् इच्छति - तर्हि सरस्वती
यदि शक्तिम् इच्छति - तर्हि दुर्गा
यदि भोजनम् इच्छति - तर्हि अन्नपूर्णा
पुरुषाणां समीपे किम् अवशिष्टं ताण्डवं विहाय।